# Upadeshatmakam Patram

# ઉપદેશાત્મકં પત્રમ્

## Document Information

Text title : Upadeshatmakam Patram 1

File name : upadeshAtmakaMpatram1.itx

Category : misc, shrIdharasvAmI, advice

Location : doc_z_misc_general

Author : Shridharasvami

Proofread by : Manish Gavkar

Description/comments : shrIdharasvAmI stotraratnamAlikA

Latest update : February 11, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 12, 2023

*sanskritdocuments.org*

Upadeshatmakam Patram

# ઉપદેશાત્મકં પત્રમ્

(અનુષ્ટુપ્છન્દઃ)

યત્સત્તયા જગત્સત્યં યચ્ચૈતન્યેન ચેતનમ્ ।
યત્સુખાત્સુખરૂપં ચ તજ્જ્ઞેયં બ્રહ્મ શાશ્વતમ્ ॥ ૧॥

ભવાબ્ધિતરણી નૌકા યા ભક્તિઃ પરમાત્મનિ ।
લબ્ધવ્યાસા પ્રયત્નેન ભવ દુઃખનિવૃત્તયે ॥ ૨॥

અન્યાભાવાદદ્વયો યઃ શ્રીધરઃ ખલુ શાશ્વતઃ ।
અખણ્ડાનન્દ એવાસૌ દ્વૈવિદ્ધ્યં તસ્ય દુર્ઘટમ્ ॥ ૩॥

દ્વિતીયાદ્વૈ ભયં બ્રૂતે શ્રુતિરન્યં નિષેધ્ય ચ ।
એક એવ હ્યસૌ જ્ઞેયઃ શ્રીધરઃ શ્રુતિસમ્મતઃ ॥ ૪॥

એકસ્મિન્નપરસ્યેયં ભ્રાન્તિઃ સા ન સુખાવહા ।
એક એવ હિ ભૂતાત્મા શ્રુતિર્વક્તિ ભયાપહા ॥ ૫॥

તત્ત્વમસ્યાદિવાક્યૈશ્ચ બ્રહ્મૈક્યં યત્સ્ફુટીકૃતમ્ ।
સત્યં સત્યં ત્રિવારં તત્ નાત્ર કાર્યા વિચારણા ॥ ૬॥

સ્વસ્મિન્નેવ જગત્સર્વમન્યવત્સમ્પ્રતિષ્ઠિતમ્ ।
સ્વાજ્ઞાનતો ન સત્યં તજ્જ્ઞેયં શ્રેયોઽભિલિપ્સુભિઃ ॥ ૭॥

અજ્ઞાનાત્ સ્વાત્મમાત્રસ્ય વ્યવહારો વિભાસતે ।
શિષ્યાચાર્યાદિભાવૈશ્ચ ગ્રાહ્યગ્રાહકતોઽપિ વા ॥ ૮॥

અદ્વિતીયં બ્રહ્મતત્ત્વં ન જાનન્તિ યદા તદા ।
ભ્રાન્તા એવાખિલાઃ સર્વે શ્રુતિર્વક્તિ વિવેકતઃ ॥ ૯॥

સર્વં વિભાતિ સ્વસ્માદ્ધિ સ્વયં તસ્યાદ્યનન્તરમ્ ।
સ્વરૂપં ચ સ્વતઃ સિદ્ધં મધ્યાદ્યન્તવિવર્જિતમ્ ॥ ૧૦॥

યસ્ય ભાસા સર્વમિદં સ્વયં તત્સ્વાર્ચિમત્સુખમ્ ।

ભ્રાન્ત્યેત્થં ન વિજાનાતિ લોકોઽયં કિં વદામિ ભોઃ ॥ ૧૧॥

અજ્ઞાત્વા ચ સ્વપૂર્ણત્વં સુખરૂપં ચ શાશ્વતમ્ ।
લોકોઽયં ભ્રાન્ત એવેહ નાનાકર્મસુદુઃખિતઃ ॥ ૧૨॥

ઇતિ શ્રીમત્ પરમહંસપરિવ્રાજકાચાર્ય સદ્ગુરુ ભગવાન્
શ્રીધરસ્વામીમહારાજવિરચિતં ઉપદેશાત્મકં પત્રં સમ્પૂર્ણમ્ ।

Proofread by Manish Gavkar

*Upadeshatmakam Patram*
pdf was typeset on February 12, 2023

Please send corrections to *sanskrit@cheerful.com*